**Academe** *Journal of Education & Psychology*
*Volume-1, Issue-1, Year-2011 (January-June)*
*PP: 15-20* *ISSN: 2249-040X*

# श्रीमद्वाल्मीकीयरामायणस्य जीवनदर्शनम्

**डॉ दिनेश्वर यादव**
**प्रधानाचार्य**
**नंदन संस्कृत महाविद्यालय ईशहपुर ,(मधुबनी)**

## सारांश

वाल्मीकिरामायणं भारतीयैपैतिहास्य प्राणभूतो छन्यो वर्तते। एतस्मिन् यजीवनदर्शनं तदजातकालावधः न केवलं भारतीयानाम् अपितु संमारवासिनामपि प्रेरणादायक कल्याणकारकद्ध वर्तते। प्रकृते अस्मिन् शोधालेखे रामायणे वर्णितस्य गुरुगणस्य विन्तरमः प्रतिपादनं कृतम्। श्रीरामस्य अपूर्वा पितृभक्तिरप्यव वर्णिता। महर्षिविश्वामित्रेण रामलक्ष्मणयोर्यक्ररक्षार्थ यथा साहाय्यमपेक्षितं तदपि ममुल्लिखितम्। भरतस्य अपूर्वी त्यागो धातुप्रेम च प्रेरकत्वेन प्रकटितम्। हनुमतधरित्रवैशिष्ठ्यमपि समुपहितमिह। रामचरितमानससन्दर्भेण शरणागतस्य विभीषणस्य संवादोपि सम्यक्त्या समावेनितः। रामायणगतस्य जीवनदर्शनस्य विविधा नित्यनूतनाः सर्वप्रेरक प्रसङ्गा सुयुतया प्रकटिताः।

**कुटशब्दः** सत्यवाक्यः, पीनवक्षाः लोकतन्त्रम्, पितृभक्तिः, दण्डकारण्यम्, लघुमूलम्, वातजातः, विप्रपूजा, राष्ट्रियतिक्षानीतिः

## प्रस्तावना

महर्षिवाल्मीकिप्रणीतं रामायणं न केवलं भारतस्यापितु अखिलभूतलस्य आदिमं काव्यं महाकाव्यञ्चेति नाविदितं विपश्चिद्वर्वाणाम्। भारतस्य राष्ट्रियनिधिभूतोऽयं ग्रन्थः। रामायणविषये सत्यमेव कथितं वदस्य एकैकमक्षरं पुंसां महापातकनाशनमिति। रामायणे खलु ग्रन्थस्य प्रत्येकमध्यक्षरं कल्मषनाशनम् भारतैतिह्यगतं सर्वं यदिह वर्तते तदन्यत्र सर्वधा अलभ्यमेव। अस्मिन् महाग्रन्ये भारतीय पारिवारिक भौगोलिक- दार्शनिक - राजनीति मनोविज्ञानैतिहासिकादिसमन्वितं निखिलं

विवरणं महता विस्तरेण तरलितया च सुरभारत्या प्रत्यपादि। अत एव शाङ्गधरेण अभिहितम् -

कवीन्द्रं नौमि वाल्मीकि यस्य रामायण कथाम्।

चन्द्रिकामिव चिन्वन्ति चकोरा इव साहवः ।।

रामायणस्य धवणमनननिदिध्यासनसाक्षात्कारानुष्ठानेन आचार व्यवहारशिक्षायः अपि ज्ञानं भवति। ज्ञानं च पवित्रतमं जीवनध्येयमिति सर्वैरङ्गीकृतम्। जीवनोन्नयनाय रामायणी मिक्षा अतीव महत्त्वपूर्णा वर्तते। विशेषतः साम्प्रतिके समाजे यत्र खतु समाज आचारनियमा विसीक्रियन्ते। बालेषु युबसु च पारिवारिकसंस्काराणां व्यवहारनियमानां च शिक्षणमपरिहार्यमेव वर्तते।

रामायणस्य आरम्भे वाल्मीकिमुनिः तपस्त्वाध्यायनिरतं वाग्विदां वरेण्यम् अखिलन्ब्रह्माण्डे सञ्चारिणं मुनिवरं नारदं परिपृच्छति यदस्मिंल्लोके कः खलु गुणवान्, वीर्यवान्, धर्मज्ञः, कृतज्ञः, सत्यवाक्यो दृढव्रतः, सुचरित्रः, सर्वभूतहिते रतः, विद्वान्, समर्थः, एकप्रियदर्शनः, आत्मवान्, जितक्रोधः, द्युतिमान्, अनसूयकः, मंयुगे जातरोपस्तु देवानामपि भयङ्करच वर्तते। महर्षिणा पृष्टो मुनिवरो नारदः प्रोवाच यन्महर्षे वे गुणा भवता सन्दर्भिताः तैरन्यैरपि च देवदुर्लभैः गुणैर्युक्त एक एब नरर्षभो इश्वाकुवंशप्रभवो दाशरथी रामो भुवि वर्तते। स च खतु नियतात्मा, महावीयों धृतिमान्, वशी, बुद्धिमान्, बाग्मी, महाबाहुः, महोरस्कः, सुविक्रमः, परीनवक्षाः, समाधिमांचापि अस्ति। श्रीरामः खलु गुणाकर एवा तथा च-

सर्वदाभिगतः सद्भिः समुद्र इव सिन्धुभिः।

आर्यः सर्वसमधचैव सदैव प्रियदर्शनः ।।

स च सर्वगुणोपेतः कौसल्यानन्दवर्धनः।

समुह इव गाम्भीर्ये धैर्येण हिमवानिव।।'

श्रीरामस्य गुणगणानाकर्ण्य साम्प्रतमपि जनश्चकितचकित इव जायते। वर्तमानकाले यदा शिक्षायां जीवनमूल्यानां प्रायशो हाम एवाक्षिपथमवतरति तदा रामायणगतस्य आर्यावर्त्तनायकस्य एते गुणा अपरोक्षम्प्रेरणादायका भवन्ति।

बालकाण्डस्य आरम्भ एव चतुर्णामपि भ्रातृणां मिथः खेहावरभावोऽनुपमो लक्ष्यते। रामस्य कृते लक्ष्मिवर्धनः लक्ष्मणः बहिःप्राण इवापर आसीत्। रामस्तु लक्ष्मणेन विना निद्रामपि न लभते स्म। न च कदाचिन्मृष्टमनं तं विना अनाति। यदा च हयमारुको रामो बनं प्रयाति सधनुः लक्ष्मणः तं परिरक्षन्ननुयाति। लक्ष्मणावरजः शत्रुच भरतस्य कृते प्राणैरपि प्रियतरोऽवर्तत। भरतश्चापि तस्य तथैव प्रीतिपात्रमासीत्। पारस्परिकक्षेविश्वासस्य एतादृशः इदानीन्दुर्लभतामेति। एवं च ते चत्वारोपि गुरोर्वशिष्ठस्य शाखव्यपन शाखप्रजासम्पन्ना विचक्षणा नानाकलाकौशलनिष्ण स्वगेहमुपागताः।

तदानीम् आकस्मिकतया तत्र राजभवन महर्षिविश्वामित्रः प्राप्तः। अध्य निवेदितो महर्षिः राजशार्दूलं सत्यप्रतिधवं दशरथमुवाच यवहुमेक विशिष्टं नियममातिष्ठे तत्र सुबाहुमारिचाभिधर्धा राक्षसी विनकरी वर्तते इति। तयोश्च विनाशः काकपक्षधरेण सत्यपराक्रमेण रामेण एव कर्तुं शक्यः। स भवान्मां वीरं ज्येष्ठं रामं दातुमर्हसीति। महर्षेर्वचो निशम्य राजेन्द्रो महता शोकेनाविष्टो जातब्धचाल च मुमोह च। तेन च प्रत्युत्तरितं यद् रामस्तु साम्प्रतमूनषोडशवर्ष एवं वर्तते। राक्षसगणविधातावाहमेव भवता सार्धं गमिष्यामि। राजीवलोचनं रामं भवात्र नेतुमर्हतीति। तच्चुत्वा विश्वामित्रः महर्षिहुतभुक्ाजज्यात-

इति नरपतिजल्पनाद् द्विजेन्द्रं

कुशिकसुतं मुमहान् विवेश मन्युः।

सुष्ठत इव मखेऽग्रिराज्यसिक्तः

समभवदुज्वलितो महर्षिवहिनः।।

**Academe** *Journal of Education & Psychology*
*Volume-1, Issue-1, Year-2011 (January-June)*
*PP: 15-20* *ISSN: 2249-040X*

विश्वामित्रश्च तदानी दशरथं तर्जनापूर्वकमाह यत्मिध्याप्रतिज्ञः भवान् -प्रतिज्ञां हातुमिच्छासीति प्रतिश्रुत्य "पूर्वमर्थ राघवाणामयुक्तोऽयमाचारविषर्ययः। एतन्निशम्य सुव्रतो धीरो वसिष्ठो राजानमाह यद् राक्षसा विश्वामित्रेण गुप्तं रामं हन्तुं सर्वचा अक्षमाः सन्ति। कुशिकपुत्रोऽयं स्वयं सर्वान् पराजेतुं क्षमः, केवलं तब पुत्रहितार्थाय एव त्वां याचितवानस्ति अतस्त्वया निश्चिन्तेन रामः प्रेषणीय एव। एतदाकर्ण्य राजा रामं लक्ष्मणद्वितीयं प्राहिणोत्। एतेन मुविदितं यद्रामायणे राजापि ब्राह्मणस्य आचार्यस्य वा मार्गदर्शनमनुसरति स्म। साम्प्रतमपि लोकतन्त्रोन्नयनाय नेतृभिः प्रज्ञावतां निर्देशा अवश्यमेव अनुगन्तव्याः।

## श्रीरामस्य अपूर्वा पितृभक्तिः

कौसल्यानन्दनो रामो यदा जनकनन्दिनीं सीतामुद्वाहा अयोध्यामुपागतः। पौरास्तु तदनल्पानन्दवर्धनं दृश्यं लोकं लोकं प्रसादोदधौ निमज्जिताः। केयुचिद्वत्सरेष्वतीतेषु अयोध्यापतिः परिषत्संस्तुत्वा रामं यौवराज्ये नियोक्तुमियेप। अचिरमेव रामाभिषेचनाय सज्जापि समारब्धा। पुण्यमुहूर्त्तस्य सन्देशं विज्ञाय अयोध्यानिकेतः जनः पुरी शोभवितुमारेभे। एतन्मध्य एवं किमपि अकल्पितपूर्व सर्वजनदुःखकरं घटितम्। देवी कैकेयी उक्तवती

सत्यसन्धा राजन्निदानीमेव मां वरद्वयप्रदानेन तोषयितुमर्हसि अन्यथा त्वद्विमानिता अचचैव जीवितं प्रहास्यामि। तत्र प्रथमं त्विदं यद् योवं राघवस्थाभिषेकसमारम्भ उपकल्पितस्तेन एवं भरतो मेऽभिषिच्यताम्। अपर रामः चीराजिनवरी धीरस्तापसी भूत्वा चतुर्दशवर्षाणि यावद् दण्डकारण्यं बजतु इतिः मन्वरमाश्रुत्य राजा अनिर्वचनीय कष्टमनुभूतवान्। काय तुमन्त्रमाध्यमेन राममाहूतवान्। देवीं कैकेयीपुणगन्धरा पप्रच केन मे पिता एतादृशं कष्टमापादितः ? सा उक्तवती तब पिता बरद्वयं मां दत्तवान्। तद्यदि पालयितुमनुजानाति चेत्ते पिता नूनं जीवितं धारयिष्यति। रामो बदति -

किमिदमप्रासङ्गिकं भाषसे? अहन्तु पितुराज्ञापालनाय पावके पतेयं तीक्ष्णं वियं भलवेयम् अर्णवे वा पतेयम्। नूनमेव पितुर्वचनं करिष्ये इति प्रतिजाने रामो द्विर्नाभिभाषते। ततश्च कैकेयी दारुणं वचनं रामायोक्तवती। रामस्तद्विचनं विश्रुत्य न विव्यथे केवलमेतावदेवोक्तवान्- पित्रा एवं कथमहं न आदिष्ट इति।

पितृभक्त्याप्लावितो रामः सीताद्वितीयो लक्ष्मणसहितश्च दण्डकारण्यं गन्तुमुद्यतोऽभवत्। सीता अपि यदा राममनुसर्तुं बद्धपरिकरा सञ्जाता तदा रामेण निवारितापि सीता प्रत्युत्ततार बदहं रामस्यानन्यास्मि। अहमपि दुर्गं वनं पुरुषवर्जितं नानामृगगणाकीर्ण शार्दूलगणसेवितं गमिष्यामि। लक्ष्मणोपि यदा गन्तुकामोभवत्तदा सुमित्रा स्वपुत्रमुक्तवती-

रामं दशरथं विद्धि मां विद्धि जनकात्मजाम्।

अयोध्यामटवीं विद्धि गच्छ तात यथासुखम्।।

एतदस्ति रामायणम्य जीवनदर्शनं यत्र सर्वे पारस्परिकखेहपालेन बद्धा दरीदृश्यन्ते।

**Academe** *Journal of Education & Psychology*
*Volume-1, Issue-1, Year-2011 (January-June)*
*PP: 15-20* *ISSN: 2249-040X*

## भरतस्य भ्रातृभक्तिः

भरतोपि स्वभ्रातरं रामं प्रति भक्तिभावेन आपूरितो बर्तते। म रुदन् पर्णशालास्थितस्य रामस्य बरणयोः पपात। अत्र श्रीरामः अनामयप्रश्नप्रसङ्गेन भरतं राजनीतिरहस्यमुपदिष्टवान् -

कच्चिदर्थ लघुमुलं महोदयं कर्म विनिश्चित्य क्षिप्रमारभसे? बनस्य वेतनं भक्तं च यथोचितं सम्प्राप्तकालं दातव्यं ददासि विलम्बते तु नैव? तब आयो बिपुलो व्ययो कश्चिदल्पतरो न वा? कश्चित् स्वादुकृतं भोज्यमेकस्तु नानामि?

एवंविधा नैके उपदेशा अब प्रदत्ताः सन्ति ये च साम्प्रतमपि अनुमरणीयाः।

एतदनन्तरं भरतः सविनयं निवेदितवान् यदहमिमं राज्यं नेच्छामि। अहन्तु तद्राज्यं भवते प्रतिसमर्पयामि। रामेण प्रतिज्ञावडेन तद्वचनं गोररीकृतम्। तदा भरतो हेमभूषिते पादुके तत्र संस्थाप्य प्रतिपञ्चन्द्रदर्शनं तेजसा चादित्यसंकाशं राममहजबरं तयोरारोड निवेदितवान्। श्रीरामेण तथा कृते सति ते एवं राज्यसिंहासने संरख्य राज्यसञ्चालनं व्यदधादिति भातृभक्तिः सततं अदृष्टपूर्वा अधुतपूर्वा भरतस्यापूर्वमुदालचरित्रं रामचरितमानस एवं वर्णितम् -प्रणम्या।

परम पुनीत भरत आचरनू। मधुर मंजु मुद मंगल करनु।

हरन कठिन कनि कलुष कलेमू। महामोह निति दलन दिनेसू।।"

## हनुमन्तक्ष्मणवोर्जीवनवृत्तम्

किष्किन्धाकाण्डे यदा हनुमतः इदम्प्रथमो मिलनाबसरो रामलक्ष्मणाभ्यां जातस्तदा श्रीरामः हनुमतो वार्तावैशिष्ठ्यमेवं वर्णयति यद् एष खलु नूनं वेदविदस्ति। अथ चानेन कृत्यं व्याकरणं बहुधा धुतं यतोहि सम्पूर्ण अपि प्रकरणे अनेन किमपि नापभापितमिति। भाषाया व्यवहारस्य च यद्वैशिष्ठ्यमत्र वर्णितं तदतीव हथं ग्राह्यं चास्ति। अस्मिन्नेव काण्डे यदा मुग्रीवो गहनाया गुहाया आभरणानि आनीय उक्तवान् किमेतानि सीतायाः सन्ति? तानि वीक्ष्य लक्ष्मणो वदति-

नाहं जानामि केयूरे नाहं जानामि कुण्डले।

नुपूरे त्वभिजानामि नित्यं पादाभिवन्दनात्।।'

भ्रातृजाया मातृबदभिवन्दनीयेति यदुपदिष्टं मात्रा सुमित्रया तदत्र प्रत्यक्षमवलोक्यते। सेयमपूर्वा सर्वजनसमादृता भारतीया संस्कृतिः।

सुन्दरकाण्डे भगवत्याः सीताया अन्वेषणाय यदा सकलगुणनिधानो रघुपतिप्रियभक्तो वातजातो हनुमान् मध्येसमुद्रमासीत्तदा समुद्रेण मैनाको निर्दिष्टो हनुमती विधामाय। परं हनुमांस्तु क्षणमपि तत्र अनवस्थित्य मैनाक संस्पृश्य एव एतत् कथयन्नये प्रस्थितो यन्नास्तीदानीं

हनुमान तेहि परसा कर पुनि कीन्ह प्रनाम।

राम काजु कीन्हें बिनु मोहि कहाँ विधाम।।*

कार्य वा साधयेयं देहं वा पातयेयमिति लक्ष्यपूर्विका कार्यदृष्टिः

**श्रीरामविभीषणयोः संवादः**

युद्धकाण्डे यदा विभीषणो रावणेन भर्तितः श्रीरामस्य शरणमुपागतः। तदा रामः अनायासोपस्थितस्य अविदितचरितस्थ तस्य विषये ज्ञातुं मन्त्रिणो निर्दिष्टवान्। सर्वे स्वविचारान् प्रकटितवन्तः। संस्कारसम्पनेन सचिबोत्तमेन हनुमता हृष्णमर्धवन्मधुरं लघु च यदनादि तदेव सर्वेषां श्रीरामस्य च प्रेष्ठं संवर्तक। स बदति-

एप देश काला भवतीह यथा तथा।

पुरुषात् पुरुषं प्राप्य तथा दोषगुणावपि ।।

दौरात्म्यं रावणे दृष्ट्वा विक्रमं च तथा त्वयि।

युक्तमागमनं हात्र सदृशं तस्य बुद्धितः।।

प्रसङ्गोयमद्यापि सर्वत्र विशेषतो वैदेशिकराजनीतिप्रकरणे नूनमवधेयः। श्रीरामस्य वर्णनं कुर्वता श्रीमहोत्वामितुलसीदासेन रामचरितमानसे लङ्काकाण्डे सुमहद्धर्णितम्। यदा रणभुवि रावणः स्वरथमारहा सैन्यसज्जितः समायातः। विभीषणो रामं विरथिनं विलोक्य चिन्ताकुतितमानसः सविनयं पृष्टवान्। हे नाथा भवतः पार्श्वे रथ-शिरखाणोपानदादिकं किमपि न बर्तते। एवंरीत्या प्रबलः शत्रुः कथं जेष्यते? तदा रघुनाथः श्रीराम उवाद यद्विजयरधस्तु भिन्न एव भवति। भके, सत्यशीले शौर्यरी दें ते पताका समारयासमतारज्युप्रिर्ईराभक्तिः प्रवीणस्सूतः, वैराग्यं चर्ग, सात्तोपः खद्गमः, दान भानुः बुद्धिः प्रचण्डा शक्तिः, बरं विज्ञानं च कोदण्डो वर्तते। निर्मलं मन इषुधिः, शमयमनियमा शराः, विप्रपूजा च शिरस्त्राणरूपेण वर्तते । एपोस्ति विजयरचः। यह एतेन सञ्चरते तं न कचिदपि जेतुं शक्रोति -

रावनु रथी विश्व रघुबीरा। देखि विभीषन भयउ अधीरा।

सखा धर्ममय अस रथ जाकें। जीतन कहें न कतहुँ रिपु ताकें।।

रामायणस्य श्रवणमननाध्ययनमाहात्म्यं च स्वयमेव महर्षिवाल्मीकिना एवं भणितम् -

आयुष्यमारोग्यकरं वशस्यं

सौभ्रातृकं बुद्धिकरं शुभं च।

श्रोतव्यमेतनियमेन सद्धि-

राख्यानमोजस्करमृद्धिकामैः।।"

एवञ्च स्फुटमेतत् यद् रामायणस्य जीवनदर्शनम् सर्वेः मर्वदा सर्वथा चारणीयम्। राष्ट्रीयशिक्षानीतौ (2020) समभिव्यक्ता प्राचीनभारतीयज्ञानविचारसमृद्धपरम्पराया

आलोकदृष्टिरपि अन्वर्थक्तया अत्रैव सभ्यते 1 अतः भारतीयसमाजस्य आचारव्यवहारचरित्रमूल्यसंवर्धनाय च गेहे गेहे रामायणम् इत्यभियान सञ्चालनीयम्।

## सन्दर्भा

1. वाल्मीकिरामायणम्, बालकाण्डम् 1/16-17
2. तत्रैव 21/28
3. वाल्मीकिरामायणम्, अयोध्याकाण्डम् 40/9
4. तत्रैव, 100/1-76
5. रामचरितमानस, अयोध्याकाण्ड दोहा 325/3
6. वाल्मीकिरामायणम्, किष्किन्धाकाण्डम् 3/27-35
7. तत्रैव 3/22-23
8. रामचरितमानस, सुन्दरकाण्ड, दोहा 1
9. बाल्मीकिरामायणम्, युद्धकाण्डम् 17/57-58
10. रामचरितमानस, लङ्काकाण्ड दोहा 79/1-6
11. वाल्मीकिरामायणम्, युद्धकाण्डम् 128/125
12. महर्षिवाल्मीकिः, श्रीमद्वाल्मीकीय रामायण (प्रथम खण्ड), गीताप्रेस, गोरखपुर, विक्रम संवत् 2068
13. महर्षिवाल्मीकिः, श्रीमद्वाल्मीकीय रामायण (द्वितीय खण्ड), गीताप्रेस, गोरखपुर, विक्रम संवत् 2068
14. बाल्मीकि रामायण, सम्पादक स्वामी जगदीश्वरानन्द सरस्वती, विजय कुमार गोविंदराम हासानन्द, नई दिल्ली, 2021
15. गोस्वामी तुलसीदास, श्रीरामचरितमानस, टीकाकार हनुमानप्रसाद पोद्दार, गीताप्रेस, गोरखपुर, विक्रम संवत 2082
16. अध्यात्म रामायण, सम्पादक स्वामी तपस्यानन्द, रामकृष्ण मठ, चेन्नई, 2012
17. The Ramayana, Editor - Bibek Debroy, Penguin Random House, Gurgaon, 2016
18. Ramayana (Critical Edition), Bhandarkar Oriental Research Institute, Pune, 1960
19. Ramayana of Valmiki, Translation - Robert P. Goldman, Princeton University Press, Princeton, New Jersey, USA, 1984